श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीकूरनारायणस्वामि विरचितम्

# ॥ श्रीसुदर्शनगद्यम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः
श्रीमते रामानुजाय नमः

# ॥ श्रीसुदर्शनगद्यम् ॥

बहिरन्तस्तमश्छेदि ज्योतिर्वन्दे सुदर्शनम्।
येनाव्याहतसङ्कल्पं वस्तु लक्ष्मीधरं विदुः॥

जय जय श्रीसुदर्शन ब्रह्ममहाचक्रभूपाल !

देवदेव !

सन्ततसाहित्यसुधामाधुरीझरीधुरीणस्वान्तोल्लास-
रसिककविजननिकरश्रवणमनोहारिगुणाभिध-
सुधास्यन्दिसन्दोहसुन्दरमतिविश्राणनपरायण !

तिलशश्शकलितशत्रुशरीरवैकल्यसन्दर्शन-
सञ्जातसम्मोदपरम्पराकलितसम्पातसन्दर्भ-
निर्झरीघसम्पूजितारसञ्चय !

प्रकाशमाननवीनविद्रुमवल्लीमतल्लिकावेल्लित-
परिसरतरङ्गितज्वालाषण्डमण्डितनेमिमण्डल-
निजनेम्यञ्चलज्वलदनलज्वालालीलाविलास्य-
पल्लवितकोरकितकुसुमितफलितमल्लिका-
मतल्लिकाजालवेल्लितसल्लकीभल्लातकीफाल-
तमालसालप्रमुखविविधविचित्रतरुषण्डमण्डितवन-
विजृम्भणदवदहनकरालज्वालावलीविलासवक्त्र-
ज्वलदरमण्डलपरिमण्डित !

निखिलसलिलनिधिसलिलसम्भारसारम्भ-
परिरम्भणनिपुणबडबानलघुमुघुमित-
प्रभापटलसदृशज्वालाकलाप !

www.prapatti.com

निर्मर्यादविजृम्भमाणविमितप्रतापातपप्रोद्यत्ताप-
समृद्धिदत्रिभुवनत्राणपण्डित !

परितःप्रवृत्तलोलार्चिष्पटलीविस्पष्टिताष्टापदीरेखा-
चिह्नितलम्बमानविलसत्पट्टांशकालिङ्गन !

स्वर्लोकद्रुमशाखिकाप्रतिभटमधुरि-
पूल्लसद्बाहादण्डविलग्नवैभव !

कनकविरचितकमनीयशलाकवद्दृश्यमानाराव-
परम्परालङ्कृतदिव्यविग्रहसमाश्रितजनविषय-
विश्राणितकनककाहलकलाचितकामुक्ता-
छत्रचामरपीठिकाकाञ्चनभृङ्गारकनककिरीट-
केयूरकर्णिकाकुण्डलत्रिसरपञ्चसरहार-
हीराङ्गुलीयककनकोपवीतकाञ्चीनूपुरगज-
तुरगसुरसुन्दरीसकाशपरिचारिकाप्रमुखानेक-
वस्तुनिस्तुलैश्वर्यसम्पान !

स्वकीयतेजःपटलतिरस्कृतचण्डकिरणमण्डल-
प्रचण्डभुजदण्डकण्डूकृतसमयजलधरघोर-
घोषाटोपलोभकृद्गर्जनतर्जनादिकरणचणनिर्जर-
रिपुवधूवैधव्यविधानसन्नद्धज्वालामाला-
परिवृताग्रप्रतीक !

प्रतिपक्षपक्षविक्षेपदक्ष !

मधुरतरसरससुधारसपरिवाहपरिपूर्णमहत्तर-
सुधाकरालवाललसत्स्वकीयवपुःकल्पज्योतिः-
प्रवालसुमनस्सम्पद्विश्रुत !

बाहाशाखासहस्रावृतिलसदवनिव्योम-
नाकादिसीम !



www.prapatti.com

दिङ्मुखमण्डलमण्डनायितबन्धूकप्रभापटल-
सुगगकान्तिमण्डलमण्डितजलधरशकलमेदुर-
ज्वालावतंस !

किङ्करीकृतशङ्कर !

ज्ञानशक्त्यादिगुणगणप्रसिद्ध !

सकलशत्रुविनाशक !

पावकपरितापितकनकरसरमणीय-
किरणश्रेणीरञ्जितदशदिश !

दवदहनशिखावद्दीर्घतरज्वालावलीप्रचण्डप्रताप !

सुमनस्सीमन्तिनीपक्ष्मलपङ्क्तिन्यञ्चनकरतुहिन-
जलनिरसनपटुतरकिरणनिकराकार !

अज्ञानतिमिरपटलजनितविचिन्तिताकरजनि-
रजनीभञ्जनव्यञ्जनवैभव !

ग्रहनक्षत्रतारकानलप्रकाशप्रतारण-
निपुणप्रताप !

निखिलसुरवरनिकरपरिचरित-
चरणनलिनयुगल !

असुरप्रतापानलप्रतप्तचतुराननशङ्करपुरन्दर-
षडाननप्रमुखविबुधगणपरिविनुतज्वालाकलाप !

त्रुटितदितिसुतकठिनतरकण्ठखण्डनिरन्तर-
निस्सरद्रुधिरधाराहविष्परम्परास्वादद-
चञ्चुचञ्चत्समञ्चलकरालज्वालाजिह्वा-
वह्निलप्रथिकप्रथितप्रभाव !

www.prapatti.com

युद्धसिद्धान्तसन्नद्धविरुद्धासुरप्रत्यायकालात-
कल्पसहस्रारसुपञ्जर !

उत्करुणाव्रतधारासम्प्लावित-
समाश्रितजनौघसङ्घात !

अधरीकृतसुधाकरपूर्णमण्डलयन्त्रतन्त्रित !

विविधविचित्रप्रहरणमण्डितभुजमण्डलकृशानु-
ज्वालावलीविलासोपलालिताननपङ्कज !

निजनेमिविक्रमक्रमाक्रान्तचक्रवालाचलप्रचलित-
भूचक्रनिष्पीडितशेषफणामण्डलप्रयाणपुराण !

खण्डितविविधविचित्राशेषास्त्रगर्वसम्पन्न !

रथचरणनायकपुरन्दरभयसंहारक-
प्रत्यर्थिमारणकालदण्डभुजदण्डमण्डित-
मालिनामधेयराक्षसगदाप्रहरणसञ्जनित-
निर्वेदपराङ्मुखविनतानन्दनमांसलांस-
पीठाध्यासनवैकुण्ठप्रयुक्तस्वतेजःप्रभाव-
भस्मीकृतरथगजतुरगपदाति-
समाकीर्णशत्रुसैन्यविदलितपक्षविनिर्यद्रुधिर-
धाराभ्यक्तमुक्ताफलतुङ्गतरङ्ग-
परम्परासंवलितसागरविहारकुतूहल !

स्वकीयप्रभापटलकबलितद्वादशादित्यतेजस्क !

स्वकीयविक्रमसन्दर्शनसञ्जनितदुर्वाराखर्वगर्व-
तारूढसुपर्वसुभटभुजास्फोटनसम्भूतघोर-
घोषाटोपभयङ्करसङ्गररङ्गचतुरतरसञ्चार !

ज्वालाजटालप्रलयसमयपावकप्रतापप्रतिमप्रभाव !

सुरवरनिकरनिबिडतरविपिनविलसनदहनचतुर-
स्वभावस्वकीययशोवैभवधवलितवसीय !

नक्रविक्रमक्रमाक्रान्तनिर्विक्रमगजेन्द्र-
रक्षणनिपुणव्यापार !

निशिततरखड्गनिकृत्तशत्रुशरीरखण्डनिरन्तर-
निःसरद्रक्तधारापरम्पराप्रकटितसन्ध्याराग-
समग्रस्वकीयविविधविचित्रविहाराखण्डित-
कीकसनिकुरुवप्रत्यर्थितनक्षत्रसमुन्मेष-
विजृम्भितमधुरसास्वादसञ्जातसमुल्लास-
विवशविबुधविलासिनीनिश्शङ्कहासकोलाहल-
प्रदर्शितशिशिरकरनिकरप्रथितमहासङ्गर-
प्रवीणप्रत्यर्थिराजपरम्पराविजयसमासादित-
वीरलक्ष्मीविलासोपलालितशरीरभाव !

अतिघोरभयङ्करमहासुरपरिपन्थिसंहननिरसन-
समधिगतनिरर्गलविनिर्गलद्रुधिरपलल-
विस्रप्रध्वंसनपटुतरमधुरबहुलगलदमल-
मधुरतरकुसुमरसपरिमलघुमुघुमितरुचिर-
विविधमालापरिमण्डितोद्दण्डकुण्डलित-
पिण्डिकाखण्डितप्रचण्डसंवर्तमार्ताण्डमण्डल !

शोणमणिद्रवसपक्षप्रभाव्याप्तान्तराल !

परिहसितविकसिताशोककुसुमरागारुणतरविग्रह !

खण्डितविपक्षराजकठोरकण्ठधमनीमुखनिरन्तर-
निर्यातरुधिरप्रवाहविरचितातिरक्त-
रक्तवर्णाक्षधिष्ण्य !

रणक्षितिविचक्षणरक्षःपक्षपरीक्षितसालक्षित-
वैलक्ष्यसहस्राक्षपक्षसुरक्षणदीक्षिताक्षप्रभाव !

स्वकीयज्वालाविलासतृणीकृतप्रतिभटप्रयुक्त-
प्रहरणप्रकारघुमुघुमायमानघोरघोषाटोप-
विघटितभगवद्योगनिद्रासमुद्रसङ्क्षोभन-
विचक्षणस्वकीयप्रलयसमयजलधरघोर-
घोषातिभीषणरक्षोवक्षोविक्षोभसमर्थन-
प्रचण्डसञ्चारभञ्चितकङ्कालकशेरुकाक्षुण्ण-
दैतेयसङ्घात !

सलिलनिधिसलिलविलयक्वथनसमुदित-
ध्वनिपिशुनितनिरर्गलरसातलप्रयाणवैचित्र्य !

कुलाचलकूटतटविपाटनरटनप्रकटितवसुधा-
मण्डलोद्दण्डगमनविलक्षणस्वसञ्चरित-
भुवनजनदुरितपटलविलयनपटीयमाहात्म्य !

स्वाश्रितजनसुधासारानिजधाराव्यापार !

निजगमनकृतसकलभुवनसंरक्षणप्रख्यापित-
पाशपाणित्रासमुद्रितसमुद्र !

सगरुदगप्रकम्पनप्रदानकत्रिजगन्निन्द्यदानव-
विचित्रविनाशकरीप्रतापप्रभाव !

निजकपिशकिरणविभवव्याप्तसज्जककुसुम-
बन्धूकृतप्रभाकरसुधाकरमण्डलपद्मराग-
मणिषण्डसमनक्षत्रगणप्रकाशिताकाशसञ्चार !

प्रतिभटपरम्परादिधक्षाकृतपातालप्रवेशसमय-
निजज्वालावलीलास्यविलासस्पन्दनदंदह्यमान-
मुक्ताफलादिरत्नप्रकरचूर्णनिकुरुम्बशतगुणित-
चुलकितज्ज्वलजलनिधे !

हतरमणदनुजरमणीहृदयवर्मितरसातलकुहर-
सञ्चारनिरर्गलविनिर्गलत्स्वप्रभाप्रभाव-
निगीर्णतिमिरनिकुरम्ब !

स्वकीयधाराघोरविघट्टनक्षुण्णनक्षत्रगण-
शशिधवलक्षोदनभसितनिचयविकरण-
धवलितदिगन्तविवरपरिकर !

निखिलजगज्जन्मरक्षाशिक्षापक्षपातेकदीक्ष !

मार्गामार्गविज्ञाननिरसनचतुरतिमिरपटल-
विघटनपटुचटुलप्रदीपप्रतिमारसाहस्र !

त्रिभुवनभवनभारभरणनिपुणमणिस्तम्भ-
संरम्भसखारनिकरालङ्कारप्रकटित-
निजपराक्रमसमाक्रान्तसकलदिङ्मण्डल-
यशोवितानधवलीकृतभुवनत्रय !

प्रचण्डचण्डकूश्माण्डखण्डन !

ज्वालाविलासचूडालमौले !

उद्दण्डप्रचण्डपूर्वगीर्वाणगर्वापहारक !

चन्द्रधाराधारषट्कोणमध्यग !

शङ्खचक्रगदाखड्गशूलपाशवज्रखेट-
हलमुसलचापबाणकुन्तपरशुदण्डानल-
प्रमुखानेकप्रहरणमण्डलपरिमण्डित-
प्रचण्डोद्दण्डदोर्दण्डविलसच्छ्रीमच्छ्री-
महासुदर्शनचक्राधीश नमो नमस्ते !

॥ इति श्रीसुदर्शनगद्यं समाप्तम् ॥

www.prapatti.com